श्रीशुभमस्तुनिर्विघ्नमस्तुश्रीमहागणपतयेनमःश्रीशा
रदाजयतितस्यैनमःश्रीगुरवेनमःश्रीगुरुदक्षिणामूर्त
येनमःनिधायहृदिविघ्नेशंविधायगुरुवंदनं।।बाला
नांसुखबोधायक्रियतेतर्कसंग्रहः।।१।।द्रव्यगुण क
र्मसामान्यविशेषसमवायाभावाःसप्तपदार्थाः।
तत्रद्रव्याणि।पृथिव्यप्तेजोवायुराकाशकालदिगात्म
मनांसिनवैव।।रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्व

त०।स० संयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखे
॥१॥ च्छाद्वेषप्रयत्नधर्माधर्मसंस्कारमेदाश्चतुर्विंशतिगुणाः॥उत्क्षेपणावक्षे
पणाकुंचनप्रसारणगमनमेदात्पंचकर्माणि॥सामान्यंद्विविधं।परमप
रंचेति।नित्यद्रव्यवृत्त्योर्विशेषास्त्वनंताएव।समवायस्त्वेक एव॥
अभावःश्चतुर्विधः।प्रागभावःप्रध्वंसाभावोत्यंताभावोन्योन्याभावः
श्चेति।तत्रगंधवतीपृथिवी।सादिविधानित्यानित्याचेति।नित्या
परमाणुरूपा।अनित्याकार्यरूपा।पुनस्त्रिविधा।शरीरेंद्रियवि
षयभेदात्।शरीरमस्मदादीनां।इंद्रियंगंधग्राहकंघ्राणं॥

तच्च नासाग्रवर्ति।। विषयो मृत्पाषाणादिः।। शीतस्पर्शवत्यआपः।। ताश्चद्वि
विधाः।। नित्याअनित्याश्चेति।। नित्याः परमाणुरूपाः।। अनित्याः कार्यरूपाः।।
पुनस्त्रिविधाः।। शरीरेंद्रियविषयभेदात्।। शरीरं वरुणलोके।। इंद्रियं रस
ग्राहकं रसनं।। तच्च जिह्वाग्रवर्ति।। विषयः सरित्समुद्रादिः।। उष्णस्पर्शवत्तेजः।
तद्द्विविधं।। नित्यमनित्यं चेति।। नित्यं परमाणुरूपं।। अनित्यं कार्यरूपं।। पुनः
स्त्रिविधं। शरीरेंद्रियविषयभेदात्।। शरीरमादित्यलोके।। इंद्रियं रूपग्राहकं
चक्षुः।। तच्च कृष्णताराग्रवर्ति।। विषयश्चतुर्विधः।। भौमादिव्योदर्याकरजभे
दात्।। भौमं वह्न्यादि।। दिव्यं अंबुधनं विद्युदादि।। भुक्तस्यपरिणामहेतुरौदर्यं।।

त०स० आकरजंसुवर्णादि॥रूपरहितस्पर्शवान्वायुः॥सद्विविधः॥नित्योनित्य
श्चेति॥नित्यःपरमाणुरूपः॥अनित्यःकार्यरूपः॥पुनःस्त्रिविधः॥शरी
रेंद्रियविषयभेदात्॥शरीरंवायुलोके॥इंद्रियंस्पर्शग्राहकंलक्॥सर्वरा
२ रीरवृत्ति॥॥विषयोवृक्षादिकंपनहेतुर्वायुः॥शरीरांतःसंचारीवायुःप्राण
श्च॥सचैकोयुपाधिभेदात्प्राणापानादिसंज्ञांलभतेशब्दगुणकमाकारां।
तंत्रैकंविभुनित्यंच॥अतीतादिव्यवहारहेतुःकालः॥सचैकोविभुर्नित्य
श्च॥प्राच्यादिव्यवहारहेतुर्दिक्॥सचैकाविभुश्चनित्याच॥ज्ञानाधिकरण
मात्मासद्विविधः॥परमात्माजीवात्माचेति॥तत्रेश्वरःसर्वज्ञःपरमात्मा
८ एकएव॥

जीवस्वशरीरभिन्नः।। विभुर्नित्यश्च।। सुखाद्युपलब्धिसाधनमिंद्रियं
मनः।। तच्चप्रत्यात्मनियतत्वादनंतंपरमाणुरूपंनित्यंच।। चक्षुर्मात्रग्राह्योगु
णोरूपं।। तच्चशुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं।। पृथिवी
जलतेजोवृत्ति।। तत्रपृथिव्यांसप्तविधं।। अप्सुशुक्लंजले।। भास्वरशुक्लं
तेजसि।। रसनग्राह्योगुणोरसः।। सचमधुराम्ललवणकटुकषायतिक्तभेदा
त्षड्विधः।। तत्रपृथिव्यांषड्विधः।। जलेमधुरएव।। घ्राणग्राह्योगुणोगंधः।।
सद्विविधः।। सुरभिरसुरभिश्चेति।। पृथिवीमात्रवृत्तिः।। त्वगिंद्रियमात्र
ग्राह्योगुणस्पर्शः।। सत्रिविधः।। शीतोष्णानुष्णाशीतभेदात्।। पृथिव्यप्ते
जोवायुवृत्तिः।।

तत्र शीतस्पर्शवत्यापः।।उष्णस्पर्शवत्तेजसि।।अनुष्णाशीतः पृथिवीवायोः।।रूपादिष्वनु
न॰स॰ पृथिव्या
३ ष्टयंपाकजमनित्यं।।अन्यत्रापाकजंनित्यमनित्यंच।।नित्यगतंनित्यमनित्य
गतमनित्यंएकत्वादिव्यवहारहेतुःसंख्या।।नवद्रव्यवृत्तिः।।एकत्वादिपरा
र्धपर्यंता।।एकत्वंनित्यगतंनित्यं।।अनित्यगतमनित्यं।।द्वित्वादिकंतुस
साधारण
र्वत्रानित्यमेव।।मानव्यवहारैकारणंपरिमाणं।।नवद्रव्यवृत्ति।।तच्चतुर्विधं।
साधारण
अणुमहद्दीर्घह्रस्वंचेति।।पृथक्त्वव्यवहारैकारणंपृथक्त्वं।।सर्वद्रव्यवृत्ति।।
संयुक्तव्यवहारहेतुःसंयोगः।।सर्वद्रव्यवृत्तिः।।संयोगनाशकोगुणोविभा
गः।।सर्वद्रव्यवृत्तिः।।परापरव्यवहारासाधारणकारणेपरत्वापरत्वे।।तद्वि
विधे।।

दिक्कृते कालकृते चेति।। दूरस्थेदिक्कृतंपरत्वं।। समीपस्थेदिक्कृतमपरत्वं।। ज्येष्ठे
कालकृतंपरत्वं।। कनिष्ठेकालकृतमपरत्वं।। आद्यपतनासमवायिकारणंगु
रुत्वं।। पृथिव्जलवृत्ति।। आद्यस्यंदनासमवायिकारणंद्रवत्वं।। पृथिवीजल
तेजोवृत्ति।। तद्द्विविधं।। सांसिद्धिकंनैमित्तिकंचेति।। सांसिद्धिकंजले।
नैमित्तिकंपृथिवीतेजसोः।। पृथिव्यांघृतादौअग्निसंयोगजंद्रवत्वं।। तेज
सिसुवर्णादौ।। चूर्णादिपिंडीभावहेतुर्गुणस्नेहः।। जलमात्रवृत्तिः।। श्रोत्र
ग्राह्योगुणःशब्दः।। आकाशमात्रवृत्तिः।। सद्द्विविधः।। ध्वन्यात्मकोवर्णा
त्मकश्चेति।। ध्वन्यात्मकोभेर्यादौ।। वर्णात्मकःसंस्कृतभाषादिरूपः।। ध्व

त॰स॰ सर्वव्यवहारहेतुर्ज्ञानंबुद्धिः॥सद्विविधा॥स्मृतिरनुभवश्चेति॥संस्कारमात्रजन्यं
ज्ञानंस्मृतिः॥तद्भिन्नंज्ञानमनुभवः॥सद्विविधः।यथार्थोयथार्थश्चेति॥नद्वि
४ तत्प्रकारकानुभवोयथार्थः॥सेवप्रमेत्युच्यते॥तदभाववतितत्प्रकारकानुभवो
यथार्थः॥सएवाप्रमेत्युच्यते॥यथार्थानुभवश्चतुर्विधः॥प्रत्यक्षानुमितिउपमि
तिशाब्दभेदात्॥तत्करणमपिचतुर्विधं॥प्रत्यक्षानुमानोपमानशाब्दभेदा
त्॥असाधारणकारणंकरणं॥कार्यनियतपूर्ववृत्तिकारणं॥कार्येणप्रागभा
वप्रतियोगिकारणंत्रिविधं॥समवायिकारणंसमवायिनिमित्तभेदात्॥यत्समवेतंका ४
र्यमुत्पद्यतेतत्समवायिकारणं॥यथातंतवःपटस्य।पटश्चस्वगतरूपादेः॥

कार्येणकारणेनवासहैकस्मिंन्नर्थेसमवेतंसत्कारणमसमवायिकारणं॥
यथातंतुसंयोगःपटस्य॥तंतुरूपंपटगतरूपस्यच॥नदुभयस्मिंन्नंकारणं
निमित्तकारणं॥यथातुरीवेमादिकंपटस्य॥तदेतत्त्रिविधकारणमध्ये
यदसाधारणकारणंतदेवकरणं॥तत्रप्रत्यक्षज्ञानकरणंप्रत्यक्षं॥इं
द्रियार्थसंन्निकर्षजन्यंज्ञानंप्रत्यक्षं॥तद्द्विविधं॥निर्विकल्पकंसविकल्पकं
चेति॥निष्प्रकारकं ज्ञानंनिर्विकल्पकं॥सप्रकारकं ज्ञानंसविकल्पकं॥यथा
डित्थोयं ब्राह्मणोयंश्यामोयमिति॥प्रत्यक्षज्ञानहेतुरिंद्रियार्थसंन्निकर्षः
ष्वद्विधः॥संयोगःसंयुक्तसमवायःसंयुक्तसमवेतसमवायस्समवायस्स

त०स० स्समवेतसमवायोविशेषणविशेष्यभावश्चेति॥चक्षुषाघटप्रत्यक्षजननेसंयो
गःसंन्निकर्षः॥घटरूपप्रत्यक्षे संयुक्त समवायः॥चक्षुःसंयुक्तेघटेरूपस्यस
मवायात्॥रूपत्वसामान्यप्रत्यक्षेसंयुक्तसमवेतसमवायः॥चक्षुःस्संयुक्तेघटेरूपं
समवेतंतत्रस्थरूपत्वस्यसमवायात्॥श्रोत्रेणशब्दसाक्षात्कारेसमवायःसंन्निकर्षः।
कर्णविवरवृत्त्याकाशस्यश्रोत्रत्वात्॥शब्दस्याकाशगुणत्वाद्गुणगुणिनोःसमवा
यात्॥शब्दत्वसाक्षात्कारेसमवेतसमवायःसंन्निकर्षः॥श्रोत्रसमवेतेशब्देशब्दत्व
स्यसमवायात्॥अभावप्रत्यक्षेविशेषणविशेष्यभावस्संन्निकर्षः॥भूतलंघटाभा
ववदित्यत्रचक्षुःसंयुक्तेभूतलेघटाभावस्यविशेषणत्वात्॥एवंसंन्निकर्षजन्यंज्ञा
नंप्रत्यक्षं॥तत्करणमिंद्रियं॥तस्मादिंद्रियंप्रत्यक्षप्रमाणमितिसिध्यंति॥इतिप्रत्यक्ष
परिच्छेदःसमाप्तः॥छ॥श्री॥

श्रीगणेशायनमः श्रीशारदायनिसत्यं।।अनुमितिकरणमनुमानं।।परामर्श
जन्यज्ञानमनुमितिः।। व्याप्तिविशिष्टपक्षधर्मताज्ञानंपरामर्शः।।यथावान्हि
व्याप्यधूमवानयंपर्वतइतिपरामर्शः।।तज्जन्यंपर्वतोवान्हिमानितिज्ञानम
नुमितिः।।यत्रधूमस्तत्राग्निरितिसाहचर्यनियमोव्याप्तिः।। व्याप्यस्यपर्वता
दिवृत्तित्वंपक्षधर्मता।।अनुमानंद्विविधं।।स्वार्थपरार्थंचेति।।स्वार्थंस्वानुमि
तिहेतुः।।तथाहि।।स्वयमेवमहानसादौयत्रधूमस्तत्राग्निरितिमहानसादौ
व्याप्तिंगृहीत्वापर्वतसमीपंगतस्तद्धेतोवाग्नेःसंदिहानःपर्वतेधूमंपश्यन्त्वा
प्तिंस्मरतियत्रधूमस्तत्राग्निरिति।।तदनंतरंवान्हिव्याप्यधूमवानयंपर्वतइति
ज्ञानमुत्पद्यतेऽयमेवलिंगपरामर्शइत्युच्यते।।तस्मात्पर्वतोवान्हिमानिति

न्स॰ ज्ञानमु
अनुमीयते॥ तदेवं स्वार्थानुमानं। यत्तु स्वयमेव धूमादग्निमनुमाय
परप्रतिपत्त्यर्थं पंचावयववाक्यं प्रयुंक्ते तत्परार्थानुमानं यथा। पर्वतोवन्हिमा
न्धूमवत्वात् योयो धूमवान्सोऽग्निमान्यथा महानसस्तथा चायं तस्मात्तथे
ति॥ अनेनवाक्येन प्रतिपादितालिंगात्परोऽग्निं प्रतिपद्यते। प्रतिज्ञाहे
तूदाहरणोपनयनिगमनानि पंचावयवाः॥ पर्वतावन्हिमानिति प्रतिज्ञा।
धूमवत्वादिति हेतुः। योयोऽग्निमान्सा योयो धूमवान्सोऽग्निमा
न्यथा महानस इत्युदाहरणं। तथा चायमित्युपनयः। तस्मात्तथेतिनिग
मनं। स्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्शएवकरणं। तस्मा॰लिंगप
रामर्शोनुमानं। लिंगंत्रिविधं॥

अन्वयव्यतिरेकि केवलान्वयिकेवलव्यतिरेकि चेति। अन्वयव्यतिरेकेनयाप्तिमद्द्रव्यत्वादिः। यथावह्नौसाध्ये धूमवत्वं। यत्र धूमस्तत्राग्निर्यथामहानस इत्यन्वयव्याप्तिः। अन्वयमात्रव्याप्तिकं। यत्राग्निर्नास्ति तत्र धूमोपिनास्ति यथाम हाह्रदइति व्यतिरेकव्याप्तिः। अन्वयमात्रव्याप्तिकं केवलान्वयि। यथाघटोभिधेयः प्रमेयत्वात्पटवदित्यत्रप्रमेयत्वाभिधेयत्वयोर्व्यतिरेक व्याप्तिर्नास्तिसर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च। व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा। पृथिवी तरेभ्योभिद्यते। गंधवत्वात्। यदितरेभ्यानभिद्यते नतद्गंधवद्यथातलं। नचेयं तथा। तस्मान्ननथेति। अत्रयद्गंधवन्नदितरभिन्नमित्यन्वयदृष्टांतोनास्ति। पृ थिवीमात्रस्यपक्षत्वात्। संदिग्धसाध्यधर्मावान्पक्षः। यथाधूमवत्वेहेतोपर्वतः। श्रीराम्

त॰स॰ निश्चितसाध्यवान्सपक्षः।यथात्रैवमहा॰नसः।निश्चितसाध्याभाववान्विपक्षः।
यथोत्रैवमहाह्रदः।सत्यमिचारविरुधसत्प्रतिपक्षासिद्धबाधिताः पंचहेत्वा
भासाः।सत्यमिचारोनैकांतिकः।सत्त्रिविधः।साधारणासाधारणानुपसंहा
रीभेदात्।तत्रसाध्याभाववद्वृत्तिः साधारणः।यथापर्वतोवन्हिमान्प्रमेयत्वात्।
अत्रप्रमेयत्वस्यवन्ह्यभाववत्तूह्रदे विद्यमानत्वात्।सर्वसपक्षव्यावृत्तोसाधार
णः।यथाशब्दोनित्यःशब्दत्वात्।अत्रशब्दत्वंसर्वेषांनित्यत्वेव्यावृत्तं
शब्दमात्रवृत्ति।अन्वयव्यतिरेकदृष्टांतरहितोनुपसंहारी।यथा।स ७
र्वमनित्यंप्रमेयत्वात्।अत्रसर्वस्यापिपक्षत्वादृष्टांतोनास्ति।साध्या
भावव्यासोहेतुर्विरुधः।यथाशब्दोनित्यः कार्यत्वादृष्टवत्। ९ —

यस्यसाध्याभावसाधकंहेत्वंतरंविद्यतेससत्प्रतिपक्षः।यथाशब्दो
नित्यःश्रावणत्वाद्धिनित्यःकार्यत्वाद्घटवत्।असिद्धःस्त्रिविधः।
आश्रयासिद्धःस्वरूपासिद्धोव्याप्यत्वासिद्धश्चेति।आश्रयासिद्धो
यथा।गगनारविंदंसुरभ्यरविंदत्वात्सरोजारविंदवत्।अत्रगगे
नारविंदमाश्रयः।सत्वनास्त्येव।स्वरूपासिद्धोयथा।शब्दोगुणश्चा
क्षुषत्वात्।अत्रचाक्षुषत्वंशब्देनास्तिशब्दस्यश्रावणत्वात्।सोपाधि
र्धिकोव्याप्यत्वासिद्धः।साध्यव्यापकत्वेसतिसाधनाव्यापकत्वमु
पाधिः।साध्यसमानाधिकरणस्यंताभावाप्रतियोगित्वंसाध्यव्यापकत्वं।

न॰स॰ साधनवंनिष्ठात्यंताभावप्रतियोगित्वंसाधनाव्यापकत्वं।पर्वतोधूमवान्
वन्हेरित्यत्रार्द्रेंधनसंयोगउपाधिः।यत्रधूमस्तत्रार्द्रेंधनसंयोगइतिसाध्यव्या
पकता।यत्रवन्हिस्तत्रार्द्रेंधनसंयोगइतिनास्त्ययोगोळकेआर्द्रेंधनसंयोगाभा
वात्।एवंसाध्यव्यापकत्वेसतिसाधनाव्यापकत्वादार्द्रेंधनसंयोगउपाधिः।
सोपाधिकत्वाद्वन्हिमत्वंव्यायत्वासित्थं।यस्यसाध्याभावःप्रमाणांतरेणनि
श्चितःस्सबाधितःयथावन्हिरनुष्णःपदार्थत्वात्।अत्रअनुष्णत्वंसाध्यंतद्
भावउष्णत्वं त्वाचप्रत्यक्षेणगृह्यतइतिबोध्यं।व्याख्यातमनुमानं।इत्यनुमान
परिच्छेदः उपमितिकरणमुपमानं।संज्ञासंज्ञिसंबंधज्ञानमुपमितिः।।

तत्करणंसादृश्यंज्ञानं॥ तथाहि कश्चिद्वृद्धवयश्शब्दार्थमजानन्कुतश्चिदा
रण्यंपुरुषाद्गोसदृशंगवयंनिशम्यतावन्नगतोवाक्यार्थंस्मरन्वगोसदृशं
पिंडंपश्यति॥ तदनंतरमयंगवयपदवाच्यइत्युपमितिरुत्पद्यतेचास्या
नमुपमानं। इत्युपमानपरिच्छेदःसमाप्तः। आप्तवाक्यंशब्दः। आप्तस्तु
यथार्थवक्तावाक्यंतुपदसमूहः। शक्तंपदं। अस्मात्पदादयमर्थोबोद्ध
व्यइतीश्वरसंकेतःशक्तिः। आकांक्षायोग्यतासंनिधिश्च वाक्यार्थज्ञा
नहेतुः। पदस्यपदांतरव्यतिरेकप्रयुक्तान्वयानुभावकत्वमाकांक्षा।
अथवाधीयोग्यता। पदानामविलंबेनोच्चारणंसंनिधिः। आकांक्षादि

त॰ स॰ रहितं वाक्यं नप्रमाणं। यथा गौरश्वः पुरुषो हस्तीति वाक्यं न प्रमाणं।
आकांक्षाविरहात्। ओ अग्निनासिंचतीति वाक्यं न प्रमाणं। योग्यता वि
रहात्। प्रहरे प्रहरे सहोच्चरितानि गामानेयेत्यादि पदानि न प्रमाणं।
सांनिध्याभावात्। वाक्यं द्विविधं। वैदिकं लौकिकं चेति। वैदि
कमीश्वरोक्तत्वात्सर्वमपि प्रमाणं लौकिकं त्वाप्तवाक्यं प्रमाणं। अन्य
दप्रमाणं। क वाक्यार्थज्ञानं शाब्दज्ञानं। तत्करणं शब्दः। एवं यथार्थो
नुक्तवोनिरूपितः इति शब्दपरिच्छेदः समाप्तः श्रीसीतारामप्रसन्न

अयथार्थानुभवस्त्रिविधः। संशयविपर्ययतर्कभेदात्। एकस्मिन्नूध
र्मिणिविरुधनाना धर्मवैरिद्धज्ञानंसंशयः। यथास्थाणुर्वापुरुषोवेति।
मिथ्यानंविपर्ययः। यथाशुक्तौविदंरजतमिति। व्याप्यारोपेणव्यापका
रोपस्तर्कः। यथायदिवान्हिर्नस्यान्नर्हि धूमोपिनस्यादिति। स्मृतिरपि
द्विविधा। यथार्थायथार्थेति। प्रमाजंन्यायथार्था। अप्रमाजंन्याअय
थार्था। सर्वेषामनुकूलतयावेद्नीयंसुखं। प्रतिकूलतयावेद्नीयं
दुःखं। इच्छाकामः। क्रोधोद्वेषः। कृतिःप्रयत्नः। विहितकर्मजंन्यो
धर्मः। निषिधकर्मजंन्योऽधर्मः। बुध्यादयोष्टवात्ममात्रगुणाः॥ ६१

न॰स॰ बुद्धीच्छाप्रयत्नानित्याअनित्याश्च।नित्येश्वरस्य।अनित्याजीवस्य।
१० संस्कारःस्त्रिविधःवेगोभावनास्थितस्थापकश्चेति।वेगःपृथिव्यादिचतुष्ट
यमनोवृत्तिः।अनुभवजन्यास्मृतिहेतुर्भावना।आत्ममात्रवृत्तिः।अन्यथा
कृतस्यपुनस्तादवस्थ्यापादकस्थितःस्थापकः।कटादिपृथिवीमात्रवृत्तिः।
चलनात्मकंकर्म।ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं।अधोदेशसंयोगहेतुरपक्षे
पणं।शरीरसंनिकृष्टदेशसंयोगहेतुराकुंचनं।विप्रकृष्टसंयोगहेतुःप्रसा
रणं।अन्यत्सर्वंगमनं।नित्यमेकमनेकानुगतंसामान्यं।परंसत्ता।अपरंद्रव्य
त्वादि।नित्यद्रव्यवृत्तयोयार्वन्तकाविशेषाः।नित्यसंबंधःसमवायः।छ॥

अयुतसिद्धवृत्तिः।।ययोर्मध्येऽएकमविनश्यदवस्थमपराश्रितमेवावतिष्ठेते तावयुतसिद्धौ।यथाऽवयवावयविनौ।गुणगुणिनौ।क्रियाक्रियावंतौ।जाति व्यक्तीविशेषनित्यद्रव्येचेति।अनादिःसांतःप्रागभावःउत्पत्तेःपूर्वंकार्यस्य। सादिरनंतःप्रध्वंसाभावःउत्पत्तेरनंतरंकार्यस्य।त्रैकालिकसंसर्गाभावो त्यंताभावःयथाशुद्धतलेघटोनास्तीति।तादात्म्यावच्छिन्नप्रतियोगिताका भावोन्योन्याभावःयथाघटःपटोनभवतीति।सर्वेषामपिपदार्थानामुक्त भेदांतर्भावोसर्वेषांपदार्थाइतिसिद्धम्।काणादन्यायमतयोर्बालव्युत्पत्ति सिद्ध्यर्थं।अन्नंभट्टेनविदुषारचितस्तर्कसंग्रहः।इतितर्कसंग्रहःसमाप्तः।छ

॥ श्रीशारदाजयतिसत्यं॥

दी॰ पि॰ श्रीसद्गुरुचरणारविंदाभ्यांनमः॥ विश्वेश्वरंसांबमूर्तिंप्रणिपत्यगिरांगुरुम्॥
टीकांशिशुहितांकुर्वेनक्कसंग्रहदापिकां॥१॥चिकीर्षितस्यग्रंथस्यनि
११ विघ्नपरिसमाप्त्यर्थंशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकमिष्ट्
वतानमस्कारात्मकंमंगलंशिष्यशिक्षायैग्रंथतोनिबध्नन्चिकीर्षितंप्रति
जानीते॥निधायेति॥ननुमंगलस्यसमाप्तिसाधनत्वंनास्तिमंगलेकृतेपिकि
रणावल्यादौसमाप्त्यदर्शनान्मंगलाभावेपिकादंबर्यादौसमाप्तिदर्शनाच्चान्व
यव्यतिरेकाभ्यांव्यभिचारादितिचेन्न॥किरणावल्यादौविघ्नबाहुल्यात्समाप्त्यभावः
कादंबर्यादौग्रंथादृहिरेवमंगलंकृतमतोनव्यभिचारः॥ननुमंगलस्यकर्तव्यत्वेकिं

द्रव्यं विभजते। तत्रेति। तत्र द्रव्यादिमध्ये। द्रव्याण्येवेत्यन्वयः। कानि तानीत्यत आह। पृथिवीति। ननु तमसोदृश्यमानत्वात्कथं द्रव्यं नवद्रव्याणीति। तथाहि। नीलं। तमश्चलतीत्यबाधितप्रतीतिर्बलान्नीलरूपाधारतयाक्रियाधारतयाच तमसोद्रव्यत्वं तावत्सिध्यम्। न च तमसोनाकाशादिपंचकेंतर्भावः रूपवत्त्वात्। अतएव नवायोस्पर्शभावात्सदागतिमत्त्वाभावाच्च। नापि तेजसि भास्वररूपाभावादुष्णस्पर्शाभावाच्च। नापि जलेशीतस्पर्शाभावान्नीलरूपवत्त्वाच्च। नापि पृथ्व्यां गंधाभावात्स्पर्शरहितत्वाच्च। तस्मान्तमो

न० दी ९३ द्रव्यमिति चेन्न। तमसस्तेजोभावरूपत्वानुपपत्तेः। तमो नरूपिद्रव्यमालोकासहभूतचक्षुर्ग्राह्यत्वादालोकाभाववत्। रूपिद्रव्यचाक्षुषप्रमाया मालोकस्य कारणत्वान्नैवमिति चेन्न। औद्भिदकाशकानेजःसामान्याभावः साम्यः। तत्र नीलंतमश्चलतीति प्रत्ययोत्थमः। अतो नवद्रव्याणीति सिद्धं। द्रव्यत्वजातिमत्त्वगुणवत्त्वाद्द्रव्यसामान्यलक्षणं। लक्ष्ये कदंबादावतिव्याप्तिर्यथा गोः कपिलत्वं। अलक्ष्ये लक्षणस्यवर्त्तनमतिव्याप्तिर्यथा गोः शृंगित्वं। लक्ष्यमात्रावृत्तित्वमसंभवः। यथा गोरेकशफवत्वं। एतद्दूषणत्रयरहितं नवधमोलक्षणं। १३

सएवासाधारणधर्मइत्युच्यते। लक्ष्यतावच्छेदकसमनियतत्वमसा
धारणत्वं। यावत्तुकस्यचिल्लक्षणत्वेयावन्नावभिधेयत्वादोचातिव्या
प्तिरनसद्धारणायनट्टिंनत्वधर्मविशेषणंदेयं। व्यवहारस्यापिलक्ष
णत्वयोजनत्वेनंनदुष्यं। यावृत्तेरपिव्यवहारसाधनत्वात्। ननुगुणव
त्वंनद्रव्यलक्षणमाद्यक्षणावच्छिन्नघटेऽतिव्याप्तंनविनष्टघटस्वाद्यासं
गिनिचेंन। गुणसमानाधिकरणसत्तामिंनजातिमत्वस्यविवक्षि
तत्वात्। नंचेवमप्येकरूपंरसात्यथागीतिव्यवहाराद्रूपादावतिव्या
प्तिरितिचेंन। एकार्थसमवायादेवनादृश्यव्यवहारोपपत्तौगुणेषु
गानंगीकारात्।।

त० दी० १५१ गुणान्द्रव्यभजते। रूपादि। द्रव्यकर्मणि नलेसति सामान्यवान्गुणः गु
णलजातिमान्वा। ननु। लघुलकठिनलमृदुलादीनां विद्यमानलात्कथं च
तुर्विंशतिर्गुणाइतिचेन्न। लघुलस्य गुरुलाभावरूपलान्मृदुलकठि
नयोरवयवसंयोगविरोधलात्। कर्मविभजते। उत्क्षेपणादि। संयो
गमिनलेसतिसंयोगासमवायिकारणंकर्मकर्मलजातिमद्वा। न्न
मणादीनामपिगमनंतन्मात्रवान्नपंचलविरोधः। सामान्यंविभज
ते। परमितिपरमधिकदेशवृत्ति। अपरंन्यूनदेशवृत्ति। सामान्या
दिचतुष्टयोजातिर्नास्ति। विरोधंविभजते। नित्येति ॥

१४

पृथिव्यादिचतुष्टयपरमाणवः आकाशादिपंचकंचनित्यद्रव्याणि।
समवायस्यभेदानास्तीत्याह।। समवायस्तिनि।अभावंविभजते।
प्रागभावेति।तत्रोद्देशक्रमानुसारत्प्रथमंपृथिव्याःलक्षणमाह।
तत्रेति।नाम्नापदार्थसंकीर्त्तनमुद्देशः।उद्देशक्रमेचसर्वत्रैवैव
नियामिका।ननु।सुरक्ष्यसुरक्ष्यवयवारब्धेद्रव्येपरस्परविरो
धेनगंधानुत्पादाद्व्याप्तिः।नचतत्रगंधप्रतीत्यनुपपत्तिरिति
वाच्यंऽवयवगंधस्यैवतत्रप्रतीतिसंभवेनचित्रगंधानंगीका
रान्किंचोत्पन्नविनष्टघटादावव्याप्तिरितिचेन्न।

न॰ही॰ गंधसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षितत्वात्।
१५ ननुजलादावपि गंधप्रतीतिरितिचेन्नान्वयव्यतिरेकाभ्यां
पृथिवीगंधस्यैवतन्त्रमानांगीकारात्। ननुकालस्यसर्वाधा
रतयासर्वैर्लक्षणानांकालेनव्याप्तिरितिचेन्न।सर्वाधा
रताप्रयोजकमिंद्रियसंबंधेनलक्षणस्यविवक्षितत्वात्
।पृथिवींविभजते।सादिर्विधेतिनित्यत्वंध्वंसाप्रतियो १६
गित्वं।अनित्यत्वंध्वंसप्रतियोगित्वं।प्रकारांतरेणविभजते।
पुनरिति।आत्मनोभोगायतनंशरीरंयदवच्छिन्नात्मनि

भोगोजायतेतद्भोगायतनम् । सुखदुःखसाक्षात्कारोभोगः । शब्दे
नरूपादिविशेषगुणानाश्रयतेसतिज्ञानकारणमनःसंयोगाश्रयत्वे
मिंद्रियत्वम् । शरीरेंद्रियार्थानांनोविषयः । एवंचगंधवच्छरीरंपार्थि
वशरीरंगंधवद्घ्राणेंद्रियंपार्थिवंघ्राणेंद्रियंगंधवान्विषयःपार्थिवोविषे
यइतितल्लक्षणंबोध्यंपार्थिवंशरीरंदर्शयति । शरीरमिति
इंद्रियंदर्शयतींद्रियमितिगंधग्राहकमितिप्रयोजनं ।
घ्राणमितिसंज्ञा । नासाग्रेत्याश्रयोक्तिः । एवमुत्तरत्रापि ।
पार्थिवेविषयंदर्शयतीति । मृत्पाषाणादीनिति । अपांलक्षणमाह ।

नंदी॰ शीतानि उत्पलविनष्टजलेअग्न्यादिवारणायशीतस्पर्शसमानाधिक
१६ रणद्रव्यलाघवज्ञानिमलविवर्द्धिनंभ॰ शीतशिलानलमित्यादौजलसंब
धादेवशीतस्पर्शमानमितिभाष्यादिभिः अन्यत्सर्वंपूर्ववत्याख्येयम्।
तेजसोलक्षणमाह उष्णस्पर्शवदिति उष्णंलोहमितिश्रुतौतेजस-स
योगानुविधायिलोहादिभिः विशेषंविभजतेभौमेति। ननुसुवर्णं
पार्थिवंपीतलाङ्गुरलात्हरिद्रावदितिचेन्न। अत्यंतानलसंयोगेसति १६
घृतादौद्रवत्वनाशदर्शनेनजलमध्यस्थघृतादौतन्नाशदर्शनेनचा
प्रतिबंधकेपार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधार
णात्सुवर्णस्यात्यंतानलसंयोगेसत्यनुच्छेद्यमानद्रवत्वाधिकरणत्वे
न

पार्थिवत्वानुपपत्तेः पीतद्रव्यद्रवत्वनाशप्रतिबंधकतया द्रवद्रव्यांतरसिद्धौ
मिनिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः रूपवत्तया वाय्वादिवैलक्षण्यात्।
तेजस्त्वसिद्धिस्तस्योष्णस्पर्शेना स्वरूपयोरुपहंसकपार्थिवरूपस्पर्शाभ्यां
प्रतिबंधादनुपलब्धिसंभवात्सुवर्णे तेजसामिनिसिद्धेः॥ वायुरलक्षयन्नि।
रूपरहितेनेति। आकाशादावतिव्याप्तिवारणायस्पर्शवानिति। पृथिव्यादा
वतिव्याप्तिवारणायरूपरहितेनेति। प्राणस्यकुत्रानभावइत्यनआह शरीरे
ति। सचेति। एकएवप्राणः स्थानभेदात्। प्राणवानादिरादेर्यवद्वीयनइ
त्यर्थः। स्पर्शानुमेयोवायुरित्याहि। योयंवायोवानिलत्यनुष्णाशीतस्पर्शः।
उपलभ्यते। सकचिदाश्रितः गुणत्वेरूपवंन्नचास्याश्रयः पृथिवीऽद्भूतस्प-
र्शवत्पार्थिवस्योद्भूतरूपवत्तानियमात्। नजलतेजसी। अनुष्णाशीतस्पर्श
लात्

न॰दी॰ नवि भूचतुष्टयं सर्वत्रोपलब्धिप्रसंगात्। नमनः परमाणुस्पर्शस्यानींद्रियत्वा-
तस्माद्यः प्रतीयमानस्पर्शाश्रयस्सवायुः। ननुवायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रय
त्वाद्घटवदितिचेंन। उद्भूतरूपस्योपाद्धित्वाद्यत्रद्रव्यत्वेसतिबहिरिंद्रियजंन्य
प्रत्यक्षत्वंतत्रोद्भूतरूपवत्वमितिसाध्यव्यापकत्वंपक्षेसाधनाव्यापकत्वंम्।
नचैवंतप्तवारिस्थतेजसोव्यप्रत्यक्षत्वापत्तिरिष्टत्वान्नस्माद्वपरहितत्वाद्वायु
रप्रत्यक्षः। इदानींकार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशक्रमःक
थ्यते। ईश्वरस्यासिक्षीर्षावशात्परमाणुषुक्रियाजायते। ततः परमाणुद्वय
संयोगेद्व्यणुकमुत्पद्यते। त्रिभिरेवद्व्यणुकैस्त्र्यणुकमुत्पद्यते। एवंचतुरणुका
दिक्रमेणमहतीपृथिवीमहत्यआपोमहत्तेजोमहान्वायुरुत्पद्यते॥

एवमुत्पन्नस्य कार्यस्य संज्ञिहीर्षावशात् क्रियया परमाणुद्वयविभागेभ्य
णुकनाश इत्येवं पृथिव्यादिनाशः। असमवायिकारणनाशाद्व्यणुकनाशः।
वि समभवाँकारणनाशाद्व्यणुकनाश इति संप्रदायः। सर्वत्रासमवायिकारण
नाशाद्द्रव्यनाश इति नवीनाः। किं पुनः परमाणुसम्द्वेष्प्रमाणमुच्यते। जालस्थ
र्यमरीचिस्थं सर्वत्रसूक्ष्मतनमंयद्द्रव्यमुपलभ्यते। नित्यावयवं चाक्षुषद्रव्यं तो
द्वयणुकावयवो पिसावयवः। महदारंभकत्वात्तंतुवद्द्व्यणुकाव
यवः सपरमाणुः सन्नित्यः कार्यलिङ्गवस्याप्रसंगात्सृष्टिप्रलयसङ्घा
वधानायथापूर्वमकल्पयदिति श्रुतिरेवप्रमाणं। सर्वकार्यद्रव्यध्वंसो वा
नरप्रलयः। सर्वभावकार्यध्वंसोमहाप्रलय इति विवेकः। आकाशलक्ष
यति

नन्दी॰ शब्दगुणकमिति। ननु नाकाशमपि पृथिव्यादिवन्नवा किंनेत्याह। तच्चैकमिति। भेदेप्र
१८ माणाभावादित्यर्थः। एकत्वादेव सर्वत्र शब्दोपलब्धेर्विभुत्वमंगीकर्तव्यमित्याह।
विभ्विति। सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं। मूर्तत्वं परिच्छिन्नपरिमाणत्वं वे
क्रियात्ववे वा। विभुत्वादेवात्मनो नित्यमित्याह। नित्यं चेति। कालं ल
क्षयति। अतीतेति। सर्वाधारः कालः सर्वकार्यनिमित्तकारणं। दिशोल
क्षणमाह। प्राचीति। दिगपि कार्यमात्रनिमित्तकारणं। आत्मनो ल
क्षणमाह। ज्ञानेति। आत्मा। नविभज्यते। सद्विविध इति। परमात्मनो
लक्षणमाह। तत्रेति। नित्यज्ञानाधिकरणत्वमीश्वरत्वं। नन्वीश्वरस १८
द्वावे किंप्रमाणं। ननावत्वत्वलक्षणं। तथि बाह्यमांतरं वा। नाद्यः। अत्रापि
द्रव्यत्वात्

नद्वितीयः आत्मसुखदुःखादिव्यतिरिक्तत्वात् नाप्यनुमानं लिंगाभावा
दित्तिचेन्न अंकुरादिकं सकर्तृकं कार्यत्वाद्घटवत्यनुमानस्येवप्रमाणत्वात्
उपादानगोचरापरोक्षज्ञानक्रियाकौशलनिमलंकर्तृत्वमुपादानसम
वायिकारणं सकलपरमाण्वादिसूक्ष्मवस्तुदर्शित्वात्सर्वज्ञत्वं
यः सर्वज्ञः सर्वविद्दित्यागमोपि नत्रप्रमाणं जीवस्यलक्षणमाह
जीवनिसुखादिकं जीवलक्षणं ननुमनुष्योहं ब्राह्मणोहमित्या
दौसर्वत्राहंप्रत्ययेशरीरस्यैवविषयत्वाच्छरीरमेवात्मेतिचेन्न
शरीरस्यात्मलेकरपादादिनाशेशरीरनाशादात्मनोपिनाशप्रसंगात्

दी० १९ नापींद्रियाणामात्मत्वं। योहंघटमद्राक्षंसोहमिदानींस्पृशामीत्यनुसंधाना
भावप्रसंगादन्यानुकूर्तेन्यस्यानुसंधानायोगात्। तस्माद्देहेंद्रियव्यतिरिक्तो
जीवःसुखदुःखादिवैचित्र्यात्यतिशरीरंभिन्नः। सचनपरमाणुःस्यात्सर्वश
रीरव्यापिसुखाद्यनुपलब्धिप्रसंगात्। नमध्यमपरिमाणस्तथासत्यनित्य
त्वप्रसंगेनकृतहानाकृताभ्यागमप्रसंगात्तस्मान्नित्योविभुर्जीवः। मन
सोलक्षणमाह। सुखेति। स्पर्शरहितत्वेसतिक्रियावत्वंमनसोलक्षणं। १९
नद्वित्वेतने। नच्चेति। एकैकस्यात्मनःएकैकंमनइत्यात्मनामनेक
त्वान्मनसोप्यनेकत्वमित्यर्थः। परमाणुरूपमिति। मध्यमपरिमाणत्वे

अनित्यत्वप्रसंगादित्यर्थः।ननुमनोविभुस्पर्शरहितत्वेसतिद्रव्यत्वा
काशादिवदितिचेंनामनसोविभुत्वेआत्ममनःसंयोगस्यासमवायि
कारणस्याभावाज्ज्ञानानुत्पत्तिप्रसंगः।नचविभुद्रव्यसंयोगोस्त्वे
तिवाच्यं।तत्संयोगस्यनित्यत्वेनसुषुप्त्यभावप्रसंगात्पुरीतच्चनिःसृत
स्थलेआत्ममनःसंयोगस्यसर्वदाविद्यमानत्वान्नअणुत्वेतुयद्दामनः
पुरीतन्नाडिरानिनदासुषुप्तियदानिःसरतिनदाज्ञानोत्पत्तिरित्यणुत्व
सिद्धिः।रूपंलक्षयतिचक्षुरितिसंख्यादावतियाप्तिवारणायमा
त्रपदं।रूपत्वेति।व्याप्तिवारणायगुणपदं।नव्यायत्वनीलादिसमुदाय

न दी० एवचित्ररूपमितिचेंन । रूपस्यस्यायद्रव्यनियमात् । ननुचित्रपटेऽवयव
२० रूपस्येवअवयवीतिरितिचेंन । रूपरहितत्वेनपटस्यात्यक्षत्वसंगात् । न्यरू
पवत्समवेतलंभस्यत्यक्षत्वप्रयोजकंगौरवात् । तस्मात्पटस्यत्यक्ष
त्वानुपपत्याचित्ररूपसिद्धिः । रूपस्याश्रयमाह । पृथिवीतिआश्र
यंविभज्यदर्शयति । तत्रेति । रसलक्षयति । रसनेति । रसत्वेतियाप्तिवारणा
यगुणपदं । रसस्याश्रयमाह । पृथिवीति । आश्रयंविभज्यदर्शयति । तत्र
ति । गंधंलक्षयति । घ्राणेति । गंधत्वेजातियाप्तिवारणायगुणपदं । स्पर्शं
लक्षयति । त्वगिति । स्पर्शत्वजातियाप्तिवारणायगुणपदं । संयोगादावति
याप्तिवारणायगुणपदं ।
मात्र

पाकजमिति।पाकस्तेजःसंयोगस्तेनपूर्वंनश्यति।रूपांतरमुत्पद्यत
इत्यर्थः।तत्रपरमाणुष्वेवपाकोनद्व्यणुकादौआमनिक्षिप्तेघटेपरमाणु
षुरूपांतरोत्पत्तौश्यामघटनाशेपुनर्द्व्यणुकादिक्रमेणरक्तघटोत्पत्ति
स्तत्रपरमाणवःसमवायिकारणंतेजःसंयोगोसमवायिकारणमद
ष्टादिकंनिमित्तकारणंद्व्यणुकादिरूपेकारणरूपमसमवायिकारण
मितिपीलुपाकवादिनोवैशेषिकाः।पूर्वघटस्यनाशंविनैवावयवि
न्यवयवेषुचपरमाणुपर्यंतेषुयुगपद्रूपांतरोत्पत्तिरितिपिठरपाक
वादिनोनैयायिकाः।अनएवपार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः।

न॰दी॰ अन्यत्रजलादावित्यर्थः। नित्यगतमिति परमाणुपदमित्यर्थः। अनित्यग
नमिति द्व्यणुकादिगतमित्यर्थः। रूपादिचतुष्टयमुद्भूतं। प्रत्यक्षमनुद्भूत
मप्रत्यक्षं। प्रत्यक्षलक्षणप्रयोजको धर्मः। तद्भावानुद्भूतत्वं। संख्यां लक्षयति।
एकेति। परिमाणं लक्षयति। मानेति। परिमाणं विभजते। नच्चेति। भाव
प्रधानो निर्देशः। अणुत्वं महत्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः। पृथक्त्वं लक्षय
ति। पृथगिति। इदमस्मात्पृथगिति। व्यवहारकारणं पृथक्त्वमित्यर्थः। २१
संयोगं लक्षयति। संयुक्तेति। इमौ संयुक्तौ विति। व्यवहारहेतुरित्य
र्थः। संख्यादिलक्षणेसर्वत्रादिकालादावतिव्याप्तिवारणायासाधा
रणेति विशेषणीयं।

संयोगोद्विविधः कर्मजः संयोगजश्चेति आद्योहस्तक्रियया हस्तपु
स्तकसंयोगः द्वितीयोहस्तकसंयोगात्कायपुस्तकसंयोगः अवाय
वृत्तिः संयोगः स्वात्यंताभावसमानाधिकरणत्वमवायवृत्तित्वं वि
भागलक्षयति संयोगेति कालादावतिव्याप्तिवारणायगुणइति रू
पादावतिव्याप्तिवारणायसंयोगनाराकरेति विभागोपिद्विविधः
कर्मजोविभागजश्चेति आद्योहस्तकविभागः परत्वापरत्वयोर्ल
क्षणमाह परापरेति परव्यवहारासाधारणकारणंपरत्वम् अपर
व्यवहारासाधारणकारणमपरत्वमित्यर्थः तेविभजते तेद्विविधे
इति।

नं॰टी॰ दिक्कृतयोरुदाहरणमाह। दूरस्थइति। दिक्कृतकालकृतेउदाहरति।
ज्येष्ठइति। गुरुलंलक्षयति। आद्येति। द्वितीयादिपतनस्यवेगासम
वायिकारणलंद्वेगनिर्यात्तिवारणायाद्येति। द्रवलंलक्षयति। आद्येति।
स्यंदनंस्रवणंतेजःसंयोगंचनैमित्तिकं। नद्विनंसांसिद्धिकं। पार्थि
वंनैमित्तिकमुदाहरति। घृतादाविति। तेजसिनदाहः सुवर्णादा
विति स्नेहंलक्षयति। चूर्णेति। कालादावतिव्याप्तिवारणायगुणप
दं। रूपादावतिव्याप्तिवारणायपिंडीभावेति। शब्दंलक्षयति श्रो
त्रेति। शब्दत्वेतिव्याप्तिवारणायगुणपदं। रूपादावतिव्याप्तिवारणा
यश्रोत्रेति।।

शब्दः त्रिविधः संयोगजो विभागजश्शब्दजश्चेति तत्राद्यो भेरी
दंडसंयोगजन्यः द्वितीयो वंशपाद्यमानदंडद्वयविभागजन्यश्चटच
टशब्दः भेर्यादिदेशमारभ्य श्रोत्रदेशपर्यंतं द्वितीयादिशब्दाः शब्द
जाः बुध्यलक्षणमाह सर्वव्यवहारेति जानामीत्यनुव्यवसायगम्य
ज्ञानलक्षणमेवलक्षणमितिभावः बुद्धिर्विपद्यते सेति स्मृतेर्लक्ष
माह संस्कारेति भावनाख्यः संस्कारः संस्कारध्वंसेति व्यभिचार
णायज्ञानमिति प्रत्यभिज्ञायामतिव्याप्तिवारणायमात्रपदं अनु
भवंलक्षयति तद्भिन्नमिति स्मृतिभिन्नंज्ञानमनुभवइत्यर्थः॥

नन्दी० अनुभवंविभजते। सद्विविध इति। यथार्थानुभवस्यलक्षणमाह। नन्वनु
२३ नीति। ननुघटेघटत्वमितिप्रमायामव्याप्तिः। घटत्वेघटाभावादितिचेन्न।
यत्रयत्संबंधोस्तिनत्रतत्संबंधानुभवइत्यर्थाद्घटत्वेघटसंबंधोस्ती
तिनाव्याप्तिः। सेवेति। यथार्थानुभवएवशास्त्रप्रमेत्युच्यतइत्यर्थः।
अयथार्थानुभवंलक्षयति। तद्भाववतीति। नन्विदंसंयोगीतिप्रमा
यामतिव्याप्तिरितिचेन्न। यदवच्छेदेनयत्संबंधाऽभावस्तदवच्छेदेन
तत्संबंधज्ञानस्यविवक्षितत्वात्संयोगाभावावच्छेदनसंयोगज्ञानस्य २३
प्रमात्वात्संयोगावच्छेदनसंयोगसंबंधस्यसत्वान्नातिव्याप्तिः। यथा
नुभवंविभजते॥

यथार्थेति। प्रसंगात्प्रमाकरणं विभजतेतत्करणमपीति। प्रमाकरणमित्यु
र्थः। प्रमाकरणं प्रमाणमिति। प्रमाणसामान्यलक्षणं। करणलक्षणमाह।
असाधारणेति। दिक्कालादावतिव्याप्तिवारणायासाधारणेति। कारण
लक्षणमाह। कार्येति। पूर्ववृत्तिकारणमित्युक्ते रासभादावतिव्याप्ति
स्यादतोनियतेति। तावन्मात्रेकृतेकार्यतिव्याप्तिरतः पूर्ववृत्तीति। ननुनं
नुरूपमपिपरंप्रतिकारणंस्यादितिचेन्न। अननुयायसिध्वसतीति
विशेषणात्। अनन्यथासिध्वमन्यथासिधिरहितत्वम्। अन्यथासि
धिस्त्रिविधा। यिनसहैवस्यंप्रतिपूर्ववृत्तित्वमवगम्यते नंप्रति ननना
न्यथासिधं। यथातंतुनानंतुरूपंनंतुत्वंच परंप्रति। अन्यंप्रतिपूर्ववृत्तित्वेसतानएव
वस्यंप्रतिपूर्ववृत्तित्वमवगम्यते। तंप्रतितदन्यथासिधं।

न॰दी॰ यथाशब्दंप्रतिपूर्ववृत्तिलेज्ञानएवपरत्वाकाशस्य।अन्यत्रकुंभनियतपूर्ववर्ति
२५ निएवकार्यसंभवेनसहकृतमंन्यथासिद्धं।।यथापाकजस्थले गंधंप्रतिरूप
मागभावःएवमनंन्यथासिद्धनियतपूर्ववृत्तिलं कारणलं॥ कार्यलक्षणमाह।का
र्यमिति।कारणंविभजते।कारणमिति।समवायिकारणलक्षणमाह।यत्समवे
तमिति।यस्मिन्समवेतमित्यर्थः।असमवायिकारणंलक्षयति।कार्येणेति।
कार्येणेत्यनदुदाहरति।नंतुसंयोगइति।कार्यणपटेनसहएकस्मिंन्नंतोस
मवेतलान्तंतुसंयोगःपरस्यासमवायिकारणमित्यर्थः।कारणेनेत्यनदु
दाहरति।नंतुरूपमिति।कारणेनपटेनसहएकस्मिंन्नंतौसमवेतलान्तंतु
रूपंपटरूपस्यासमवायिकारणमित्यर्थः।अनिमित्तकारणंलक्षयति।। ६

नदुभयेति।समवाय्यसमवायिभिन्नंकारणंनिमित्तकारणमित्यर्थः।करणल
क्षणमुपसंहरति।तदेतदिति।प्रत्यक्षलक्षणमाह।तत्रेति।प्रमाणचतुष्टयमध्य
इत्यर्थः।प्रत्यक्षज्ञानस्यलक्षणमाह।इंद्रियेति।इंद्रियंचक्षुरादिकमर्थोघटादि
स्तयोस्संनिकर्षःसंयोगादिस्तज्जन्यंज्ञानमित्यर्थः।तद्विभजते।तद्विधेति।
निर्विकल्पकस्यलक्षणमाह।निष्प्रकारकमिति।विशेष्यविशेषसंबंधा
नवगाहिज्ञानमित्यर्थः।ननु।गोरितिविकल्पकेकिंमाणमितिचेन्नगोरितिवि
शिष्टज्ञानंविशेषणज्ञानजन्यं।विशिष्टज्ञानत्वाद्दंडीतिज्ञानवदित्यनुमा
नस्यप्रमाणत्वात्।विशेषणज्ञानस्यापिसविकल्पकत्वेऽनवस्थाप्रसंगान्नि
र्विकल्पकसिद्धिः।सविकल्पकंलक्षयति।सप्रकारकमिति।श्रीराम

न॰दी॰ नामजात्यादिविशेष्यविशेषणसंबंधावगाहिज्ञानमित्यर्थः।सविक
ल्पकमुदाहरति।यथेति।इंद्रियार्थसंनिकर्षविशेषजन्ये।प्रत्यक्षमिति।संयोग
२५ संनिकर्षमुदाहरति।चक्षुषेति।द्रव्यप्रत्यक्षेसर्वत्रसंयोगःसंनिकर्षः॥
आत्मामनसासंयुज्यते।मनइंद्रियेणइंद्रियमर्थेन।ततःप्रत्यक्षज्ञा
नमुत्पद्यतइत्यर्थः।संयुक्तसमवायमुदाहरति।घटरूपेति।तत्रयुक्तिमा
ह।चक्षुःसंयुक्तइति।संयुक्तसमवेतसमवायमुदाहरति।रूपेति॥
समवायमुदाहरति।श्रोत्रेणेति।तदुपपादयति।कर्णेति।ननुदूरस्थ २५
शब्दस्यकथंश्रोत्रसंबंधइतिचेन्न।वीचीतरंगन्यायेनकदंबमुकुलन्या
येनवाशब्दांतरोत्पत्तिक्रमेणश्रोत्रदेशेजातस्यश्रोत्रेणसंबंधात्प्रत्यक्षेत्येसंभवः।

समवेतसमवायमुदाहरति।शब्दलेति। विशेषणविशेष्यभावमुदाह
रति।अभावेति।तदुपपादयति।यदा भाववदिति। भूतले घटोनास्तीत्यत्रा
भावस्यविशेष्यस्थलंदृश्यं।एतेनानुपलब्धेः।प्रमाणांतरंनिरस्तम्।।
यद्यत्रघटोभवेन्हिभूतलमिवदृश्येतदूरीनाभावान्नास्तीतिनाकीर्त्यते
योगिसलविरोध्यनुपलब्धिसहकृतेंद्रियेणैवाभावज्ञानोत्पत्तावनुपलब्धेः।
प्रमाणांतरत्वासंभवात्।अधिकरणज्ञानार्थमपेक्षणीयेंद्रियस्यैवकरण
त्वोपपत्तानुपलब्धेःकरणत्वायोगात्।विशेषणविशेष्यभावोविशेषणविशे
ष्यस्वरूपमेव।नातिरिक्तःसंबंधःप्रत्यक्षज्ञानमुपसंहरन्नतस्यकरणमाह।
एवमिति।असाधारणकारणत्वादिंद्रियंप्रत्यक्षज्ञानकरणमित्यर्थः।प्रत्य
क्षप्रमाणमुपसंहरति।तस्मादिति।प्रत्यक्षपरिच्छेदः।अनुमानंलक्षयति।

न॰दी॰ श्रीशारदाजयति। अनुमानंलक्षयति। अनुमितिकरणमिति। अनुमितिंल
क्षयतिपरामर्शेति। ननुसंशयेनरत्यक्षेतियाप्तिस्थाणुपुरुषसंशयानंतरं
२६ पुरुषत्वव्याप्यकरादिमानयमितिपरामर्शेसतिपुरुषेवेतिप्रत्यक्षजनना
न्। नचतत्रानुमितिरेवेतिवाच्यं। पुरुषंसाक्षात्करोमीत्यनुव्यवसायविरो धा
दितिचेंन्न। पक्षतासहकृतपरामर्शजन्यत्वस्यविवक्षितत्वात्। सिसाधइषावि
रहविशिष्टस्यसिध्यभाः पक्षता। साध्यसिद्धिरनुमितिप्रतिबंधिका। सिद्धिसत्वे
यनुमितिनुयामिनी न्यायमनुमितिदर्शनास्तिसाधइषाउन्नेजका। ननश्चोन्नेज २६
कभावविशिष्टमण्यभावस्यदाहकारणत्ववास्तिसाधइषाविरहविशिष्टसिध्य
भावस्याप्यनुमितिकारणत्वम्। परामर्शंलक्षयति। व्याप्तीति। व्याप्तिविषयके

यल्लक्षधर्मनाज्ञानंसपरामर्शइत्यर्थः। व्याप्तिलक्षणमाह। परामर्शमभिनीय
दर्शयति। यथेति। अनुमितिमभिनीयदर्शयति। तज्जन्येति। परामर्शजन्यमित्य र्थः। व्याप्तिलक्षणमाह। यत्रेति। यत्र धूमस्तत्राग्निरिति व्याप्तिरभिनयः साह
चर्यनियमइतिलक्षणं। साहचर्यंसामानाधिकरण्यं। तस्यनियमः हेतुस
मानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरिय
र्थः। पक्षधर्मतास्वरूपमाह। व्याप्यस्येति। अनुमानंविभजते। अनुमानमिति।
स्वार्थानुमानंदर्शयति। स्वयमेवेति। ननुपार्थिवत्वलोहलेख्यत्वादीनांस्व
हचारदर्शनेपि वज्रमणेर्व्यभिचारोपलब्धेः क्वचिदर्शनंकथंव्याप्तिग्रहइति
चेन्न। व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्यव्याप्तिग्राहकत्वाध्व

न-दी- मिचारज्ञानंनिश्चयःशंकावत्तद्विरहः।कचित्कदाकचित्स्वतःसिध्य
एव।धूमाग्न्योर्व्याप्तिग्रहे कार्यकारणभावभंगप्रसंगलक्षणस्तर्को
२७ व्याप्तिविचारशंकानिवर्तकः।ननुसकलवह्निधूमयोरसंन्निकर्षात्
कथंव्याप्तिग्रहइतिचेंन।वह्नित्वधूमत्वरूपसामान्यप्रत्यासत्या
सकलवह्निधूमज्ञानसंभवात्।तस्मादिति।लिंगपरामर्शइत्य
र्थः।परार्थानुमानमाह।यदिति।यच्छब्दस्यतत्परार्थानुमान
मितितच्छब्देनान्वयः।पंचावयवमुदाहरणमिति।यथेति।।
।अवयवस्वरूपमाह।प्रतिज्ञेति।।उदाहरणवाक्येप्रतिज्ञादिविभागमाह

पर्वतो वन्हिमानिति। साध्यवत्तया पक्षवचनं प्रतिज्ञा। पंचम्यंतं लिंगप्रतिपादकं हे
तुः व्याप्तिप्रतिपादकमुदाहरणं। व्याप्तिविशिष्टलिंगप्रतिपादकं वचनमुपनयः।
हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम्। अबाधितत्वादिकं निगमन
प्रयोजनं अनुमितिकरणमाह। सा येति। ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्या
मेवानुमितिसंभवे विशिष्टपरामर्शः किमर्थमंगीकर्तव्य इति चेन्न। वन्हिव्याप्य
वानयमितिशाब्दपरामर्शस्थले परामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यै
वकारणत्वात्। लिंगं न करणं मतीतौ व्याप्तिचारात्। व्यापारवत्कारणं करणमितिम
तेन परामर्शद्वारा व्याप्तिज्ञानं करणं। तज्जन्यत्वे सति तज्जन्यजनको व्यापारः।

नन्दी॰ अनुमानमुपसंहरति। तस्मादिति। लिंगविभक्तेर्लिंगमिति। अन्वयव्यतिरेकि
णंलक्षयति। अन्वयेनेति। हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिस्तदभावयोर्व्याप्ति
२८ व्यतिरेकव्याप्तिः। केवलान्वयिनोलक्षणमाह। न्वयेनेति। केवलान्वयिसा
ध्यकंलिंगंकेवलान्वयिअस्त्यंनाभावाप्रतियोगित्वंकेवलान्वयित्वं। ईश्वर
प्रमाविषयत्वंसर्वपदार्थमिद्धेयत्वंचसर्वत्रास्तीति। व्यतिरेकोभावः। केवल
व्यतिरेकिणोलक्षणमाह। व्यतिरेकेति। तदुदाहरतियथेति। नान्वितस्यैद्रःप्रसिद्धो २८
वानवाअद्येयत्रप्रसिद्धस्तत्रहेतुसत्वंनयित्वंअसत्वंअसाधारण्यं। द्वितीयेसा
ध्यज्ञानाभावात्कथंनद्विशिष्टनुमितिर्विशेषणज्ञानाभावेविशिष्टज्ञानानुदया

स्तियोगिज्ञानाभावाद्व्यतिरेकव्याप्तिज्ञानमपिनस्यादितिचेंन्न।जला
दित्रयोदशान्योन्याभावानांत्रयोदशसुप्रत्येकंप्रसिद्धानांमेलनंकृत्वेयां
साध्यते। त्रयोदशत्वावच्छिन्नप्रतियोगिकसाध्यस्यैकाधिकरणवृत्तित्वा
भावान्नान्वयित्वासाधारण्ये।प्रत्येकाधिकरणप्रसिद्ध्यासाध्यविशिष्ट
नुमितिर्वातिरेकव्याप्तिनिरूपणंचोक्तमिति।पक्षलक्षणमाह।संदिग्धे
ति। ननुश्रवणानंतरमानिमाननस्थलेऽव्याप्तिः।तत्रवेदवाक्येरात्म
नोनिश्चितत्वेनसंदेहाभावात्किंचप्रत्यक्षेपिवह्न्यैयत्रेच्छयानुमितिस्त
त्राव्याप्तिरितिचेंन्न।उक्तपक्षतात्रयत्वस्यपक्षलक्षणत्वात्।।सपक्ष

न॰दी॰ लक्षणमाह।निश्चितेति।विपक्षलक्षणमाह।निश्चितेति।एवंसाधनंनिरू
पयितुं व्याससेतुंविभजते।सत्यमित्यादि।अनुमितिप्रतिबंधकयथार्थज्ञानविष
२९ यत्वंहेत्वाभासलक्षणंसत्यमित्यारभ्यविभजते।सत्रिविधइति।साधारणंलक्षयति।
तत्रेति।उदाहरति।यथेति।असाधारणंलक्षयति।सर्वेति।अनुपसंहारि
णोलक्षणमाह।अन्वयेति।विरुद्धंलक्षयति।साध्येति।सत्प्रतिपक्षंल
क्षयति।यस्येति।असिद्धंविभजते।आसिद्धइति।आश्रयासिद्धमुदाह
रति।गगनेति।स्वरूपासिद्धमुदाहरति।यथेति।व्यापत्वासिद्धस्यलक्ष
णमाह।सोपाधिकइतिउपाधिलक्षणमाह।साध्येति।उपाधिश्चतु
र्विधः।केवलसाध्यव्यापकः।पक्षधर्मावच्छिन्नसाध्यव्यापकः।साधनाव

च्छिन्नसाध्यव्यापकः उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति आद्यः
आर्द्रेधनसंयोगः। द्वितीयोयथावायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्य
त्रबहिरिन्द्रियत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपत्वं। तृतीयोयथाप्रा
गभावोविनाशीजन्यत्वादित्यत्रजन्यत्वावच्छिन्ननित्यत्वव्यापकंभा
वत्वं। चतुर्थोयथाप्रागभावोविनाशीप्रमेयत्वादित्यत्रजन्यत्वावच्छिन्ना
नित्यत्वव्यापकंभावत्वं। बाधितस्यलक्षणमाह। यस्येति। अत्रबाधस्य
ग्राह्याभावनिश्चयत्वेनसत्प्रतिपक्षस्यविरोधिज्ञानसामग्रीत्वेनसाक्षा
दनुमितिप्रतिबंधकत्वं इतरथानुपरामर्शप्रतिबंधकत्वं। तत्रापिसा धा
रणत्वाव्यभिचाराभावरूपतयाविरुद्धस्यसामानाधिकरण्याभावतया

न॰दी॰ व्याप्यत्वासिद्धस्य विशिष्टव्याप्यभावनयाऽसाधारणानुपसंहारिणोर्व्या
प्तिसंशयाधायकत्वेन व्याप्तिज्ञानप्रतिबंधकत्वं आश्रयासिद्धिस्वरूपासि
३० द्धेः पक्षधर्मताज्ञानप्रतिबंधकत्वं। उपाधिस्तु व्यभिचारज्ञानद्वाराव्याप्ति
ज्ञानप्रतिबंधकः। सिद्धसाधनंतु पक्षताविघटकतयाऽऽश्रयासिद्धावंतर्भवती
ति प्राञ्चः। निग्रहस्थानांतरमितिनवीनाः॥ इत्यनुमानं। उपमानंलक्षयति
उपमितिकरणमिति। इत्युपमानपरिच्छेदः। शाब्दंलक्षयति। आप्तेति। आप्तं
उलक्षयति। आप्तास्तिवाक्यमिति। वाक्यलक्षणमाह। वाक्यमिति। पदलक्षणमाह।
शब्दमिति। अर्थस्मृत्यनुकूलपदपदार्थसंबंधः शक्तिः। साचदोषेर्थांतरमि
तिमीमांसकास्तंनिरासार्थमाह। अस्मादिति। डित्थादीनामिवघटादीनामपि

संकेतएवशक्तिर्ननुपरार्थांतरमित्यर्थः। ननुगवादिपदानांजानोवेवशक्तिर्विशे
षणत्वेनजातेः। प्रथमोपस्थितत्वाच्चव्यक्तिलाभस्वाक्षेपादिति केचित्तन्नगा
मानयेत्यादौवृद्धव्यवहारेणसर्वत्रानयनादेर्व्यक्तावेवसंभवेनजातिविशिष्टव्यक्ता
वेवशक्तिकल्पनान्याशक्तिग्रहश्चवृद्धव्यवहारेण। व्युत्पित्सुर्बालोगामानयेत्यु
क्तमवृद्धवाक्यश्रवणानंतरंमध्यमवृद्धस्यत्रस्निमुपलभ्यगवानयनंचदृष्ट्वा
मध्यमवृद्धप्रवृत्तिजनकज्ञानस्यान्वयव्यतिरेकाभ्यांवाक्यजन्यत्वंनिश्चित्या
श्वमानयगांबध्नातिवाक्यांतरेणवाप्रोद्दाप्याभ्यांगोपदस्यगोत्वविशिष्टेश
क्तिरश्वपदस्याश्वत्वविशिष्टेशक्तिरितिव्युत्पद्यते। ननुसर्वत्रकार्यपरत्वाच्च
वहारस्य कार्यपरएववुत्पत्तिर्नेसिद्धरितिचेंन्नकाश्यां। त्रिभुवनतिलको

नन्दी० भूपतिरास्तइत्यादौसि धेपिव्यवहारादिकसितपम मेमधुकरस्तिष्ठतीत्यादौप
सिधपदसमभिव्याहारात्सि धेपिमधुकरपदादौ युत्पत्ति दर्शनाच्च। लक्षणा
३१ पिशब्दवृत्तिः शक्यसंबंधोलक्षणा। गंगायां धोष इत्यत्रगंगापदस्याप्रवाह
संबंधादेवतीरेप। प्रसिद्धौतीरेपिशक्तिर्नकल्पनेसैधवादौद्रवणाम्बयोः
परस्परसंबंधात्प्राचात् नानाशक्तिकल्पनं लक्षणात्रिविधा। जहल्लक्षणा
अजहल्लक्षणाजहदजहल्लक्षणाचेति। यत्रवाच्यार्थस्यान्वयस्तत्राज
हतीयथाच्छत्रिणोगच्छंतीति। यत्रवाचैकदेशैत्यागेनैकदेशान्वयः। तत्रज
हदजहतीयथातत्वमसीति गौण्यपिलक्षणैवलक्ष्यमाणगुणसंबंधरूपा। ३१
इयत्रवाच्यार्थस्यान्वयाभावः तत्रजिह्वतीयथामंचाः क्रोशंतीति। हंसपादपंक्ति ध्

यथाग्निर्माणवकइति। व्यंजनाशक्तिर्लक्षणांतर्भूता। अर्थशक्तिर्मूलाचानुमानादिनान्यथासिद्धा। तात्पर्यानुपपत्तिर्लक्षणा बीजंतत्प्रतीतीच्छयोच्चरितलंतात्पर्यं। तात्पर्यज्ञानंचवाक्यार्थज्ञानहेतुर्नानार्थानुरोधात्। प्रकरणादिकंतात्पर्यग्राहकं। द्वारमित्यादौपिधेहीतिशब्दाध्याहारः। नन्वर्थज्ञानार्थत्वाच्छब्दस्यार्थमविज्ञायशब्दाध्याहारासंभवादर्थाध्याहारएवयुक्तइतिचेंन। पदविशेषजन्यपदार्थोपस्थितेश्शाब्दज्ञानहेतुलादंन्यथाघटः। कुमलमानयनंरुतिरित्यत्रापिशाब्दज्ञानप्रसंगात्। पंकजादिपदेषुयोगरूढिः। अवयवशक्तिर्योगः समुदायशक्तीरूढिः। नियतपदमात्रज्ञानार्थंसमुदायशक्तिरंन्यथाकुमुदेपिप्रयोगप्रसंगात्। स्मरान्वितेशक्ति

न॰दी॰ इति प्राभाकराः। अन्वयस्य वाक्यार्थतया भानसंभवात्। अन्वयो रोपिश
क्तिर्न कल्पनीयेति गौतमीयाः। आकांक्षेति। आकांक्षादिज्ञानमित्यर्थः।
३२ अन्यथा बोध[illegible] आकांक्षादिज्ञानमात्रशब्दधीर्न स्यात्। आकांक्षां
लक्षयति। पदस्येति। योग्यता लक्षणमाह। अर्थेति। संनिधिं लक्षयमाह।
पदानामिति। अविलंबेन पदार्थोपस्थितिः संनिधिः। उच्चारणं तु नदुप
योगिनयोक्तं। गौरश्वइति। घटः कर्मेत्यनाकांक्षोदाहरणं द्रष्टव्यं। वै
दिकस्य विशेषणमाह। वैदिकमीश्वरोक्तत्वादिति। ननु वेदस्यानादि
त्वात्कथमीश्वरोक्तमिति चेन्न। वेदः पौरुषेयः। वाक्यसमूहत्वाभारतादिवं

नवस्मर्यमाणकर्तृकत्वमुपाधिः गौतमादिभिः शिष्यपरंपरया वेदेपि
कर्तृस्मरणेनसाधनव्यापकत्वान्नस्मर्तेपानात्रयोवेदाअजायंतेतिश्रुते
तिश्रुतेश्च। ननुवर्णानित्याःसएवायंगकारइतिप्रत्यभिज्ञाबलात्तथा त्वमि।
चकथंवेदस्यअनित्यत्वमितिचेन्नउत्पन्नोगकारोविनष्टोगकारइति
प्रतीत्यावर्णानामनित्यत्वात्सोयंगकारइतिप्रत्यभिज्ञायाःसेयंदी
पज्वालेतिवज्ज्वालालंबनत्वाद्वर्णानांनित्यत्वेयानुपूर्वीविशिष्टवा
क्यस्यानित्यत्वाच्च। तस्मादीश्वरोक्तोवेदः। मन्वादिस्मृतीनामाचार्यैर्वा
णांचवेदमूलकतयाप्रामाण्यंस्मृतिमूलवाक्यानामिदानीमनध्ययना

त० दी० तन्मूलप्रतीकांचिच्छाखाउत्पन्नैवेतिकल्प्यते। ननुपदप्रमाणवेदवाक्यो
त्पादनस्यकल्पइत्युक्तमशक्यतयाविप्रकीर्णवादस्यायुक्तत्वान्नित्यानु
३३ मेयोवेदोमूलमितिचेन्न। कदापिवर्णानामानुपूर्वीज्ञानासंभवेनबोध
कत्वासंभवात्। नन्वेतानिपदानि स्मारितार्थसंसर्गवंति आकांक्षा
दिमत्पदकदंबकत्वात्। मद्वाक्यवदित्यनुमानादेवसंसर्गज्ञानसं
भवाच्च। व्योनप्रमाणांतरमितिचेन्न। अनुमित्यपेक्षयाविलक्षणस्य
शाब्दज्ञानस्यशब्दात्प्रत्यक्षमीक्ष्यानुव्यवसायसाक्षिकस्यसर्वसंमत ३३
त्वात्। नन्वर्थापत्तिरितिप्रमाणांतरमस्तिपीनोदेवदत्तोदिवानभुंक्ते

इतिदृष्टश्रुतेनापीनत्वाव्यथानुपपत्यारात्रिभोजनमर्थापत्याकल्प्यतइति
चेंन।दिवदनोरात्रौभुंक्तेदिवाअश्नानपीनत्वसतिपीनत्वादित्यनुमानेनैवरात्रि
भोजनस्यासिध्यत्वात्।शतपंचाशद्दिनसंपन्नोपिअनुमानमेव-इहवटे
यक्षस्तिष्ठतीत्येतिह्यमयज्ञानमूलावत्।नकः शब्दएव।चेष्टापिशब्दा
नुमानद्वारायव्हारहेतुरितिनप्रमाणांतरं।तस्मात्प्रत्यक्षानुमानोपमा
नशब्दाश्चलोयेवप्रमाणानि इतिशब्दपरिच्छेदः।ज्ञानानांतद्धतित्व
कारकत्वं।स्वेनोग्राह्यंपरेनोवेतिविचार्यते।तत्रविप्रतिपत्तिर्ज्ञानप्रामाण्यं न
दृप्रामाण्याग्राहकयावद्ज्ञानग्राहकसामग्रीग्रासंनवेतिअत्रविरोधिकोरि
स्वतस्त्वं।निषेधकोटिःपरस्त्वं।अनुमानादिग्राह्येवनासिध्यसाधनवारणा

श्रीसद्गुरुवरणारविंदाभ्यांनमः॥ श्रीवक्रतुंडगणपतयेनमः॥
श्रीदुर्गांबायेनमः॥ गुरुर्ब्रह्मागुरुर्विष्णुगुरुर्देवमहेश्वरः॥
गुरुःसाक्षात्परब्रह्मतस्मैश्रीगुरवेनमः॥१॥वक्रतुंडम
हाकायकोटिसूर्यसमप्रभ॥निर्विघ्नंकुरुमेदेवसर्वकार्येषुस
र्वदा॥२॥नमस्तेशारदादेवेकाश्मीरपुरवासिनि॥त्वामहं
प्रार्थयेदेविविद्यादानंचदेहिमे॥३॥श्रीशंकराचार्य गुरु
भ्योनमः॥श्रीगुरुदत्तात्रेयायनमः॥सुरासुरैस्सेवितपादप
ंकजाकरेवराजत्कमनीयपुस्तका॥विरंचिपत्नीकमलासन
स्थितासरःस्वतीनृत्यतुवाचमेसदा॥४॥श्रीरस्तु

आत्मसुखदुःखादीति। विजातीयात्ममनःसंयोगस्यमानसप्रत्यक्षहेतो
रीश्वरेऽभावादितिभावः। प्रमाणत्वादिति। नचेदमप्रयोजकमितिशंक्यंका
र्यत्वावच्छिन्नंप्रतिकृतित्वावच्छिन्नस्यहेतुत्वेनाऽप्रयोजकत्वाभावादिति
दिक्। उपादानेति। यद्यपिकृतिमत्वमेवसंभवतितथाप्यपरोक्षज्ञानादेश्चि
कीर्षादिकंप्रतिकारणत्वप्रदर्शनायतथोक्तिरितिध्येयम्। सर्वविदिति। स
विदधातुर्योविशेषरूपेणज्ञानं-लक्षणमाहेति। स्वरूपमाहेत्यर्थः। मूलप्र
तिशरीरंभिन्नइति। नचावयवोपचयापचयाभ्यांतन्तुवेत्रादिशरीराणां
विभिन्नत्वेपिजीवभेदाभावादिदमसंगतं। एवंकार्यव्यूहस्थलेपीतिवाच्यं।